Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 20

No. of Printed Pages – 7

VU–94–Sans. Vangmay(Supp.)

यहाँ से काटिए

# वरिष्ठ उपाध्याय पूरक परीक्षा, 2017

## संस्कृत वाङ्मय (अनिवार्यः)

**समय** : 3¼ **घण्टे**

**पूर्णांक** : 80

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः ।

2) सर्वे प्रश्नाः अनिवार्याः ।

3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः।

5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

यहाँ से काटिए

1) आधुनिका: समीक्षका: सादरम् ''अभिनवबाणोऽयं'' इति कं सम्बोधयन्ति? [1]

2) शिवराजविजयस्य कथावस्तु कति विरामेषु विभक्तं वर्तते? [1]

3) गौरसिंह श्यामसिंहयो: भगिनी का आसीत्? [1]

4) वीरभूमिकाव्यस्य रचनाकार: क:अस्ति? [1]

5) मध्यमिका नगर्या: नृप: क: आसीत्? [1]

6) चित्रकूट पर्वत: केन प्रोद्भासितो वर्तते? [1]

7) मत्स्याकृति: चित्रकूट: कं वंशम् अरक्षत्? [1]

8) 'तव्यत् – तव्यानीयर:' इति सूत्रस्य सोदाहरणमर्थो लेख्य:। [2]

9) ''नन्दिग्रहिपचादिभ्योल्युणिन्यच:'' इति सूत्रस्य व्याख्या कार्या। [3]

10) शिवराजविजयस्य रचनाकर्तु: संक्षिप्त परिचयो देय:। [3]

11) मेदपाटस्य सौन्दर्यमहिमाविषये संक्षेपेण लिखत। [3]

12) निम्नलिखित श्लोकयो: एकस्य श्लोकस्य सप्रसंङ्ग व्याख्या विधेया – [1+3=4]

क) श्री शैल राजतनया वदनार विन्द–

सौन्दर्य पान मदघूर्णित नेत्र भृङ्गम्:।

हेरम्बमूर्ध्नि सरसं निहितैक पाणिम्,

वन्दे प्रसन्नमनसं प्रभुमेकलिङ्गम् ।।

ख) भीमोत्तरङ्गयवनप्रलयाम्बुराशौ,

मग्नेष्वनेक वसुधार मणान्वयेषु।

वैवस्वतं गुहिलवंशमपाद् गृहीत,

मत्स्याकृति: स जयतादिह चित्रकूट:।।

13) निम्नलिखित श्लोकयो: एकस्य सप्रसंग भावार्थो लेख्य: – [1+3=4]

क) आलोकिता वसुमती सकलापि किन्तु,

नालोकित: सुरूचिरो यदि मेदपाट:।

क्लिष्टं मुधा, सफलता तु विलोचनस्य,

श्रीमेदपाटवसुधा सुषमावलोकात्।।

ख) श्री कुम्भकर्ण नरनाथविनिर्मितेऽस्मि,

न्नायाहि पापकदने सदने मुरारेः।

भक्त्या नतं सकृदपीह यदुत्तमाङ्गम्,

नित्योन्नतं भवति तज्जगतां त्रयेऽपि।।

14) अधोलिखितेषु वाक्येषु पञ्च वाक्यानां संस्कृत भाषायाम् अनुवादो विधेयः – [5×1=5]

i) नगर के चारों ओर वृक्ष हैं।

ii) पिता के साथ पुत्र वन जाता है।

iii) बालक को लड्डू अच्छा लगता है।

iv) सोहन वृक्ष से गिरा।

v) श्याम मोहन से छोटा है।

vi) वह सज्जन पर क्रोध करता है।

vii) 12 वीं कक्षा में 40 छात्र हैं।

viii) वह नदी में तैरता है।

**15)** अधोलिखितेषु विषयेषु कमप्येकं विषयमवलम्ब्य 200 शब्देषु निबन्धं लिखत। **[5]**

i) परोपकाराय सतां विभूतयः

ii) नारी शिक्षायाः महत्त्वम्

iii) भारतीय संस्कृतिः

iv) मम प्रियं काव्यम्

**16)** निम्नलिखितेषु पञ्च पदानां सङ्घटनां विधाय वाक्येष्वपि प्रयोगं कुरुत – **[5×1=5]**

i) स्ना + अनीयर्

ii) कुम्भं करोति इति

iii) भिद् + क्त

iv) दा + क्त्वा

v) कृष्णं श्रितः

vi) शिवस्य अपत्यम्

vii) बन्धूनां समूहः

viii) पितुः पिता

17) निम्नाङ्कितेषु गद्यांशेषु कयोश्चिद् द्वयो: सप्रसङ्ग व्याख्या कार्या – [2×4½ = 9]

क) अथैकदा रजन्यां सिंहदुर्गाविदुर एव सुकोमल – शादायां कलित – प्रसादायां केकि – केका – विहित – प्रहरि – प्रातिनिध्यायां भुवि, निष्कृपकृपाण – पाणि:, कञ्चुकाच्छादित – कठिन – कवच: – कलित – सैनिकभट – वेष: श्रीशिववीरो गुप्तवेषेण परित: पर्य्यटन्, दुग्ध – धारयेव क्षालितैज्जो त्स्नया प्रकाशितै: पथिभिरासन्नात् शिवमन्दिरादाजगाम।

ख) इतिवक्तारं कमपि कविं त्यक्त – दिल्लीश – द्वारं निजं दिदृक्षुमत्राऽऽगतमूरीकृत्य: पुन: परिक्रम्य द्वारमार्गेण मन्दिरं प्रविश्य, शिवं प्रणम्य, घण्टामाहत्य, बिल्व – दलमुत्याप्य, नेत्रयो: संस्पृश्य शिखायां संस्थाप्य, मृतिका – शरावस्थं भस्मालिके विलिप्य प्रदक्षिण – च्छलेन पान्थाध्युषित – प्रदेश – मागत्य, तेनाऽऽलपन्तं शिवमन्दिराध्यक्षं प्रणम्य, बद्धाञ्जलिरागन्तुकमपि – ''कुत: श्रीमान्? क: श्रीमान्?'' इति सादरं समपृच्छत्।

ग) अथ दृश्यतां तत: शास्तिखानस्य काऽवस्थेति। अस्तमिते भगवति मरीचिमालिनी अन्धकारेण व्याप्तासु हरित्सु किञ्चित् किञ्चिच्चमत्कुर्वत्सु नक्षत्रेषु, शिवषीरेणाध्युषितचरस्य महाप्रसादस्याद्वालिकायामात्मीयै: शास्तिखान: समुपविष्टोऽस्ति। परितश्चानेके योद्धारो मौद्गला: पर्यवातिष्ठन्त। परितो दीपमाला चकास्ति।

घ) शास्तिखानस्तु चिक्कन – दुर्गाधिकार – युद्धस्मरणेन हतहृदय: पुनस्तादृशं रोमहर्षणं युद्धमविधित्सु: कातरतरान्तरात्मा समुवाच – ''महाराष्ट्रा युद्धक्षेत्रमपास्य पलायिष्यन्ते चेत् किमास्माकीना नानुधाविष्यन्ति? अस्मत्सेनास्वश्चावरोहा न सन्ति? ते किं घोटक – खुर – खडखडा – शब्द – श्रवणेनैनार्द्धमृत – प्रायान् कन्दरि – कन्दरेष्वर्द्धः प्रविष्टानेव शक्ति – प्रोतान् न करिष्यन्ति?।

18) एधनीयम्, कर्ता, नन्दनः, हितम्, कार्यम्, स्मारं–स्मारम्, पाकः, हसनम् एषु पञ्च प्रयोगाः साधनीयाः। [5 × 2 = 10]

19) भूतपूर्वः, यूपदारू, पञ्चगङ्गम्, राजपुरूषः, घनश्यामः, अब्राह्मणः, कण्ठेकालः, महायशस्कः एषु पञ्च प्रयोगाः साधनीयाः। [5×2=10]

20) दैत्यः, स्त्रैणः, गार्ग्यायणः, शुक्रियम्, राष्ट्रियः, शालीयः, ग्रामता, गव्यम् एषु पञ्च प्रयोगाः साधनीयाः। [5×2=10]

DO NOT WRITE ANYTHING HERE